॥ श्रीजिनाय नमः ॥

# ॥ श्रीमेतार्यमुनिचारित्रम् ॥

( कर्ता—श्रीशुभशीलगणी )

इदं पुस्तकं जामनगरवास्तव्य पं. हीरालाल हंसराजेन स्वकीये
श्रीजैनभास्करोदयमुद्रणालये मुद्रितव्यम्

वीर सं. २४६३ विक्रम सं. १९९३ सने १९३७

किं. रु. ०—४—०

Serving JinShasan
050364
gyanmandir@kobatirth.org

का.श्री कैलाससागर सूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा
का. नं.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत नं. २२७



॥ श्री जिनाय नमः ॥

# ॥ मेतार्यमुनिचरित्रम् ॥

( कर्ता—श्रीशुभशीलगणी )

वाङ्मनोंगैः समं प्राणि—रक्षां कुर्वन् भवी भुवि ॥ मेतार्यर्षिरिवाप्नोति । कल्याणकमलां द्रुतं ॥ १ ॥ तथाहि—निजर्द्धिपराभूतपुरुहूतपुरे साकेताख्ये पत्तने चंद्रावतंसाख्यो भूपो न्यायेन राज्यं करोतिस्म. तस्य सुदर्शनाख्या राज्ञी वर्तते. तस्याः कुक्षिसमुद्भवौ सागरचंद्रमुनिचंद्रनामानौ तस्य नृपस्य द्वौ सुतावभूतां. राज्ञा सागरचंद्रस्य युवराजपदवी दत्ता, मुनिचंद्रस्य चोज्जयिनीनगरीराज्यं प्रदत्तं. अथ तस्य चंद्रावतंसनृपस्य प्रियदर्शनाख्या द्वितीया राज्ञ्यासीत्, सापि गुणचंद्रबालचंद्राभिधौ सुतौ सूतेस्म. स चंद्रावतंसनृपस्त्विहलोकपरलोकहितं धर्मकार्यं करोति. अथान्येद्युः स राजा सर्वमपि राज्यकार्यं समाप्य संध्यायां

आ. श्री कैलाससागरसूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतिक्रमणादिक्रियां विधाय स्वयं कायोत्सर्गध्याने तस्थौ, यावच्चायं दीपको ज्वलिष्यति, तावन्मयाऽत्र कायोत्सर्गध्याने एव स्थेयमिति च स नियमं जग्राह. अथ राज्ञस्तं नियममजानंत्या दास्येति ध्यातं, यदि दीपोऽयं विध्याप्स्यति, तदा राज्ञ इदं कायोत्सर्गध्यानं दुःशक्यं भविष्यति, इति विचिंत्य तया तस्मिन् दीपके पुनः पुनस्तैलं तावत्प्रक्षिप्तं यावत्प्रातरभूत्. ततः प्रातर्दीपे क्षयं गते राज्ञा कायोत्सर्गः पारितः, तदैवाकस्मादायुः क्षये स राजा पंचत्वं प्राप्य स्वर्गे गतः. तदनंतरं तत्पट्टे सागरचन्द्रो न्यायेन राज्यं चकार. अथान्यदा स सागरचन्द्रो राजा तां विमातरं प्रियदर्शनांप्रति प्राह, भो मातः! इयं राज्यश्रीर्लोकं तृणापि तातं विना मां न प्रीणाति, ततो यदि तवानुमतिर्भवेत्, तदास्मै गुणचन्द्रायानुजन्मने राज्यश्रियं वितीर्याहं दीक्षां गृह्णामि. तत् श्रुत्वा तयोक्तं भो वत्स! धन्यस्त्वं, यस्यास्मिन्नसारे संसारे मनो न रज्यते, परमयं महान् राज्यभारोऽनेन लघुना तवानुजेन वोढुमशक्यः, तदधुना त्वया राज्यत्यागार्थं किमपि न वक्तव्यं. एवं तया प्रियदर्शनया राज्ञ्या प्रतिबोधितः सागरचन्द्रनृपो निर्विकल्पमना राज्यं पालयामास. अथ क्रमात्प्रवर्धमानमहर्द्धिं विस्फुरत्कीर्तिं च तं सागरचंद्रनृपं प्रेक्ष्य सा प्रियदर्शना राज्ञी स्त्री-



Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

स्वभावसुलभामीर्ष्यां वहतिस्म, यतः—अन्यस्यापि कलेर्मूलान् । पोषिका एव योषितः ॥ सापत्न्यकस्य किं वाक्यं । यस्य ता जन्मभूमयः ॥ १ ॥ यो ब्रह्मा विष्टपस्यास्य । स्रष्टेति श्रूयते जनैः ॥ सोऽपि जानाति न स्त्रीणां । चित्तानि चपलानि वै ॥ २ ॥ अथ तस्मिन् निर्दोषेऽपि भूपतौ सा द्वेषं दधाति. अथान्येद्युः स सागरचन्द्रो राजा निजलघुबंधुभ्यां युतोऽश्वक्रीडार्थमुद्याने गतः, तत्रस्थस्य च तस्य राज्ञः प्रतराशार्थं सुदर्शनाराज्ञी दास्या हस्तेन मोदकमप्रैषीत्. सा दासी गच्छंती वर्त्मनि प्रियदर्शनाया मिलिता. सपत्नीजातत्वात्तं भूपं हन्तुकामा सा प्रेक्षणमिषेण तं मोदकं विषाविले निजहस्ते जग्राह. एवं तं मोदकं विषमिश्रितं विधाय प्रीतिपुरस्सरं तं पुनस्तस्यै दास्यै समर्पयामास.

अथ वनेऽश्वक्रीडां विधाय राजा निजलघुबंधुद्वययुतो यावत्सिंहासने समुपविष्टोऽस्ति, तावत्सा दासी तं मोदकं राज्ञे ददौ. तदा स सुज्ञो राजा दध्यौ, एतौ मे लघू बांधवौ क्षुधार्तौ वर्तेते, अहं तु वृद्धोऽस्मि, अतस्तौ लघू बांधवौ विहाय मयेत्थं मोदकाशनं न शोभनं, इति विचिंत्य तेन सागरचंद्रनृपेण स मोदको द्विधा विधाय निजलघुबंधुभ्यां दत्तः. अथ यावत्तौ तं मोदकं खादतः, तावद्विषप्रणमनतोऽचेतनीभूय



P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूमौ पतितौ, एवं तौ निजबांधवौ निश्चैतन्यौ पतितौ दृष्ट्वा पीडितो राजा दध्यौ, अरेरे! यदि मातैव पुत्राय विषं ददाति, तदात्र नूनं केनापि बलवता कारणेन भवितव्यं. ततोऽसौ तत्क्षणं विषोत्तारमणिमानाय्य तत्क्षालनपानीयं तयोः पाययामास, तत्क्षणमेव तौ विषापहारात्सचेतनौ जातौ. अथ राजा दासीं पृष्ट्वा तत्र विषप्रक्षेपस्वरूपं विज्ञाय द्रुतमंतःपुरे समागत्य तां विमातरंप्रति प्राह, धिक् त्वां या त्वमेवंविधं दुष्टाचरणं मम मृत्यवेऽकार्षीः, परं त्वया रचितमिदं दुष्टाचरणं तव पुत्रयोरुपर्येव पतितं, मया तु द्रुतं मणिक्षालनपानीयेन तौ प्रगुणीकृतौ. किंच मम तु पुरापि राज्येच्छा नाभूत्, केवलं त्वदुपरोधादेव मयेयत्कालं राज्यं कृतं. अथ राज्येनाहं किं करोमि? यत्रैवंविधा पापनिर्बंधिनी श्वभ्रदायिनी बुद्धिर्जायते. इत्युक्त्वा वात्सल्यात् स सागरचंद्रो राजा प्रियदर्शनाया वृद्धाय गुणचन्द्रपुत्राय राज्यं दत्वा संयमं जग्राह. क्रमात् स एकादशांगपारीणो बभूव. अथैकदा तेन सागरचन्द्रर्षिणाऽवंतीस्वरूपं पृष्टः कश्चित्पुरुषो जगौ, तत्र मुनिचंद्रनृपस्य सौवस्तिकाख्यः पुत्रः पुरोहितपुत्रयुतः साधूनां पीडामुत्पादयति. तन्निशम्य दूनः स सागरचन्द्रर्षिर्गुरुमापृच्छ्य स्वयमवंत्यामगात्, साधूनामुपाश्रये च स्थितः. ततो मध्याह्ने भ्रातृसुतप्रतिबोध-



Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

नार्थं नृपालयमध्ये गच्छंतं तं सागरचंद्रमुनिं विलोक्य लोका जगुः, महानुभाव! त्वमत्र नृपालये मा गच्छ? तत्र राजपुत्रोऽतीवदुष्टोऽस्ति, पुरोहितपुत्रेण मिलितोऽसौ मुनिमुपद्रवति, तेन त्वमन्यत्र व्रज? इतस्तं मुनिं नृपालये प्रविशंतं दृष्ट्वा तावागत्य कथयामासतुः, भो मुने! किं त्वमावाभ्यां सह मल्लक्रीडां विधास्यसि? मुनिनोक्तं भो कुमारौ! नूनमहं युवाभ्यां सह मल्लक्रीडां करिष्ये. ततस्तौ कुमारौ रहसि चतुःशालायां गत्वा तेन मुनिना समं मल्लक्रीडां कर्तुं लग्नौ. ततो यथातथा प्रजल्पंतौ धर्मावहीलनं च कुर्वाणौ तौ कुमारौ मल्लयुद्धविज्ञेन तेन मुनिना मर्माभिघातेन तौ मुखोद्वांतफेनौ कृतौ. ततस्तयोरंगास्थिसंधीरुत्तार्य मुनिस्ततो निःसृत्य बहिरुद्याने प्रतिमया तस्थौ. इतोऽतीवाक्रंदपरयोस्तयोः मुनिविहितपराभवं विज्ञाय रुष्टो नृपः स्वसुभटान् जगौ, भो सुभटाः! येन मुनिनैतौ कुमारावीदृशीं दशां प्रापितौ, तं विलोकयत? ततो राजपुरुषास्तं मुनिं प्रतिमास्थमुद्याने निरीक्ष्य तै राज्ञोऽग्रे तत्स्वरूपं निवेदितं. ततो राजा तत्रोद्याने समागत्य तं मुनिं वीक्ष्य प्राह, भो यते! त्वयेदृक् पापं कथं विहितं? मुनिराह राजन्! आवां द्वावपि भ्रातरौ महति कुले समुत्पन्नौ स्वः. इति श्रुत्वा राजा तं निजज्येष्ठभ्रातरं समुपलक्ष्य लज्जयाऽधोमु-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खोऽभूत्, राजर्षिरपि तं धर्मलाभाशिषं दत्वाचष्ट, भो चन्द्रावतंसपुत्र! तव, ते पुत्रस्य च यत्यत्रगणनहीलनादिकरणं न युज्यते, यतः—हीलिताः साधवोऽत्यंतं। ददते नरके गतिं॥ आराधिताः शिवं पुंसां। नित्यं विश्राणयंति हि ॥ १ ॥ तव पुत्रो वाचंयमानामवहोलनं करोति, त्वं तु तत्सर्वं सहसे. तत् श्रुत्वात्यंतं लज्जितो राजा भ्रातरं नत्वा जगौ, भगवान्! एतौ कुमारौ मुग्धौ, अतः परं तौ केषामपि साधूनामवहीलनां न करिष्यतः, अहं तौ गाढं निवारयिष्यामि, अतः कृपां विधाय तौ प्रगुणौ कुरु? तदा मुनिर्जगौ, यद्येतौ संयममंगीकुर्यास्तां, तदाहं तौ प्रगुणौ करोमि, नो चेत्स्वकृतपापफलं तावनुभवतां? ततो राजा तं भ्रातरं मुनिं प्राणम्य तौ कुमारौ तस्य पार्श्वे समानयामास, निजपुत्रं च मुनिसमक्षमेवमुपालभतेस्म: भो पुत्र! अयं मुनिस्तव पितृव्योऽस्ति, त्वं च यत् सर्वदा मुनीनामुपद्रवं करोषि तन्न युक्तं. अथ यदि युवां दीक्षां गृहीष्यथस्तदैवासौ मुनिर्युवयोः शरीरं पटु करिष्यति, नो चेदनया पीडया युवां स्वयमेव मरिष्यथ. तत् श्रुत्वाऽतीववेदनाक्रांतौ तौ जगदतुः, भो तात! आवां मुनिप्रोक्तं करिष्यावः. ततो मुनिना प्रगुणीकृतौ तौ दीक्षां जगृहतुः. ततः स राजापि तस्य सागरचन्द्रमुनेर्मुखाद्धर्मदेशनामाकर्ण्य सविशेषं पु-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ण्यकार्याणि कुर्वन् सप्तक्षेत्र्यां स्वां श्रियं वपतिस्म. अथ तौ द्वावपि राजपुत्रपुरोहितपुत्रौ शुद्धं चारित्रं पालयतःस्म. परं स पुरोहितपुत्रस्तु द्विजजातित्वात् किंचिच्छरीरवस्त्रादिमलं वीक्ष्यैवं विचारयति, यदत्र साधुधर्मे शौचं नास्ति, इत्यादिचिंतनपरः स जुगुप्सां करोति. ततस्तौ द्वावपि पालितसंयमौ क्रमान्मृत्वा देवलोके सुरावभूतां. अथ तत्र स्वर्गसुखान्यनुभवंतौ तौ द्वावपि पूर्वभवस्नेहान्मिथः प्रोचतुः, आवयोर्यः पूर्वं स्वर्गाच्च्युत्वा मनुष्यो भवेत्, स स्वर्गस्थेन देवेन समेत्य धर्मे प्रतिबोधनीयः, अथैवं कृतप्रतिज्ञयोस्तयोर्विप्रजीवः पूर्वं स्वर्गाच्च्युतो राजगृहे पुरे कस्यचिच्चांडालस्य भार्यायाः कुक्षौ पुत्रत्वेनावातरत्. सा च चांडालप्रिया कस्यचित् श्रेष्ठिनो गृहे कचवरापनयनादिकार्यं करोतिस्म. तस्य श्रेष्ठिनो गर्भवत्या भार्यायाः सा चांडालपत्नी मांसभक्षणदोहदं रहोवृत्त्या पूरयामास. ततस्तयोर्द्वयोः परस्परमतीवप्रीतिर्जाता. अथान्यदा तां श्रेष्ठिपत्नीं मलिनास्यां निरीक्ष्य चांडालप्रियापृच्छत्, हे सखि! स्वामिनि! अधुना तव मनः कथं दूयते? किं त्वं भर्त्रापमानितासि? वाऽन्येन केनापि तव किमपराधः कृतोऽस्ति? तदा श्रेष्ठिनी जगौ, हे सखि! कस्याग्रेऽहमात्मनो दुःखं प्रकाशयामि? यतो मे यदपत्यं भवति, तन्न जीवति कर्मवशात्, अथ किं क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रोमि? तत् श्रुत्वा चांडालपत्नी प्राह, तव च ममाधुना गर्भः समस्ति, किंच मम तु पुत्रा एव जायते, ततः प्रच्छन्नवृत्यात्मगर्भयोर्व्यत्ययः करिष्यते. ततस्ताभ्यां द्वाभ्यामपत्ययोर्जातयोर्व्यत्ययो व्यधायि. ततो यदा यदा सा मेतपत्नी श्रेष्ठिन्याः पार्श्वे समेति, तदा तदा श्रेष्ठिनी वदति, भो सखि! त्वदीयोऽयं पुत्रो वर्धते. ततो महोत्सवपूर्वकं पित्रा तस्य पुत्रस्य "मेतार्य" इति नाम दत्तं. अथ श्रेष्ठिन्या लाल्यमानः स मेतार्यनंदनः क्रमात् पाठ्यमानः सकलकलाकलितः शशीव षोडशाब्दोऽभूत्. इतः स्वर्गस्थेन पूर्वभवमित्रेण सुरेण तत्रागत्य तस्मै मेतार्याय स्वं रूपं दर्शयित्वा प्रोक्तं, भो मेतार्य! स्वर्गस्थाभ्यामावाभ्यां या प्रतिज्ञा कृताभूत्, सा तव स्मरति न वा? अयं संसारोऽसारो विद्यते, अतस्त्वं दीक्षां गृहाण? यतः— पुरंदरसहस्राणि। चक्रवर्तिशतानि च ॥ कवलितानि कालेन। प्रदीपा इव वायुना ॥१॥ काय एष हितोपायः। संपदः परमापदां ॥ समागमाः स्वप्नसमाः। सर्वमित्यादि भंगुरं ॥२॥ एवं तेन देवेन सर्वदा बोध्यमानोऽपि स मेतार्यो वैराग्यं न प्राप्तः.

इतस्तस्य मेतार्यस्य पित्रा महेभ्यानामष्टाभिः कन्याभिः सह विवाहो मेलितः. ततः शुभेऽहनि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महेभ्यानां ता अष्टौ कन्याः परिणेतुं स मेतार्यः शिबिकारूढः समहोत्सवं राजपथे चचाल. इतस्तेन प्राग्जन्ममित्रसुरेणाधिष्ठितदेहो मेतो निजप्रियां मेतां जगौ, यद्यात्मनः सा पुत्री मृता नाभविष्यत्, तदाहमपि तस्याः पुत्र्या विवाहेन स्वं मनोरथं सफलमकरिष्यं. तत् श्रुत्वा देवाधिष्ठिता सा मेतापि सकलं सत्यं स्वपुत्रस्वरूपं तस्मै जगौ. तत् श्रुत्वा रुष्टः स मेतस्तत्र समेत्य मेतार्यं शिबिकात् उत्तार्य लोकसमक्षं जगौ, रे पुत्र! त्वं कथमेता विसदृशकुलोत्पन्नाः कन्या परिणयसि? आत्मनः कुलसदृशा एव कन्यास्तव परिणेतुं योग्याः. तत एताः कन्या विहाय त्वमात्मनो गृहमलंकुरु? आत्मनः कुलसदृशाश्च कन्यास्तव परिणाययिष्यामि. एवं सर्वेषु लोकेषु पश्यत्सु स मेतस्तं मेतार्यं स्वगृहे नीतवान्. तदा स देवस्तत्र प्रत्यक्षीभूय तं मेतार्यं रहसि जगौ, रे मित्र! पूर्वं स्वर्गे आवाभ्यां प्रतिज्ञा कृतास्ति, यः पूर्वं स्वर्गाच्च्युत्वा नरो भवेत्, स सुरेण प्रतिबोधनीयः, अथ त्वं तु प्रथमं च्युतो मनुष्यत्वं प्राप्तः, प्रतिज्ञानुसारेण मया बहुवारं प्रतिबोधितोऽपि त्वं न प्रबुद्धः, तेनेदं सर्वं विपरीतं मयैवाचरितं.

ततोऽधुनापि दीक्षाग्रहणेन त्वं निजं मनुष्यजन्म सफलं कुरु? तत् श्रुत्वा स मेतार्योऽपि प्राह,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भो मित्र! विषयासक्तोऽहं यत्त्वया प्रतिबोधितस्तद्वरं कृतं, परं त्वयाहं यल्लोकमध्ये एवं विगोपितस्तेन मे मनो दोदूयते. देवोऽवक् मित्र! संसारस्त्वेवंविधो विरस एवास्ति, यतः—प्राणेभ्योऽपीह येऽभीष्टा । यैर्विना न क्षणं रतिः ॥ वियोगः सह्यते तेषा—महो कष्टा भवस्थितिः ॥ १ ॥ नांतः कस्य प्रियः कश्चि—न्न लक्ष्म्याः कोऽपि वल्लभः ॥ नाप्तो जरायाः कोऽप्यस्ति । न तथाप्यवबुध्यते ॥ २ ॥ मेतार्यः प्राह हे मित्र! अथ त्वं केनाप्युपायेन मामितः कलंकपंकादुद्धर? ततो द्वादशाब्दीं यावद्भोगान् भुक्त्वा नूनं त्वदुक्तं करिष्ये. त्वं तु मयि कृपापरोऽसि. तत् श्रुत्वा स देवः प्रीतस्तस्मै रत्नोत्सर्गं कुर्वंतमेकं छागं, काश्चिद्विद्याश्च दत्वा स्वस्थानेऽगच्छत्. अथ दिने दिने स दिव्यश्छागो यानि यानि दिव्यानि रत्नानि समुत्सर्जति, तैस्तै रत्नैः स्थालं भृत्वा स मेतः पुत्रवचसा तं रत्नभृतस्थालं श्रेणिकनृपाय प्राभृतीकृत्य स्वसुतार्थं कन्यां याचतेस्म. तदा मंत्रिभिर्हक्कितोऽपि स मेतो निजोत्साहमत्यजन् प्रतिदिनं तथैव करोतिस्म. अथ सर्वेदिक्षु प्रास्तमरतेजांसि तानि रत्नानि वीक्ष्य विस्मितो राजा हृष्टोऽपि तत्पुत्राय निजांगजां न दत्तेस्म. अथान्यदाऽभयकुमारेणाऽभयदानपूर्वकं रत्नप्राप्तिवृत्तांतं पृष्टः स मेतस्तस्य छागस्य स्वरूपमाह. तदा तत्कौतुका-



Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लोकनाथं तं रत्नोत्सर्गिणं छागमभयकुमारो राजसभायां समानयत्, परं तत्र तु तेन छागेन दुर्गधबहुलाः स्वाभाविक्य एव विष्टागोलिका उत्सर्गिताः, तदाऽभयकुमारेण स छागो मेतार्यै पश्चात्समर्पितः. ततो निजपित्रे श्रेणिकायाभयेन प्रोक्तं स्वामिन्! तस्य मेतस्य गृहे स छागो यद्देदीप्यमानं रत्नौघमुत्सृजति, तन्नूनं कस्यापि देवस्यैवैतच्चेष्टितं, तेनायं मेतो न चांडालप्रायः, किंतु कोऽपि सत्तमः पुमान् संभाव्यते, तेनास्य परीक्षा क्रियते. अथ राज्ञानुज्ञातोऽभयकुमारस्तं मेतमाकार्य मिष्टवचनैः प्राह, भो मेत! अधुना श्रीमहावीरप्रभुर्वैभारगिरौ समायातोऽस्ति, परं तद्वंदनार्थं तत्र गिरौ यियासूनां जनानामंतरायभूतो विषमो मार्गोऽस्ति, स मार्गस्त्वया विशिष्टपदनिष्पादनात्तूर्णं सुगमः कार्यः. ततस्तेन मेतेन देवसांनिध्यतः क्षणादेवाभयोक्तं कार्यं विहितं. ततस्तेन मेतेन भूपतिनिर्देशात्तथैव देवसांनिध्येन हिरण्यमयः शृंगशृंगारितः प्राकारोऽपि कृतः. ततः सोऽभयकुमारस्तं मेतं प्रत्युवाच, भो मेत! यदि समुद्रः स्वयमत्रागत्य ते सुतं स्नपयति, तदा तस्मै तव पुत्राय भूपकन्यां दास्यामि. ततो मेतेन देवपार्श्वात् समुद्रप्रवाहमानीय सर्वलोकसाक्षिकं स निजपुत्रमेतार्यस्तेन प्रवाहेण स्नापितः. तथापि राजा तस्मै कुलहीनाय मेतार्याय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेतार्य ॥ १२ ॥ ॥ ६६ ॥

निजां कन्यां स दित्सति. तदाऽभयोऽवदत्, स्वामिन् पूर्वमपि किमुत्तममध्यमाधमजातिषु परस्परं विवाहो नाऽभूत्? यतः—एकवर्णमिदं सर्वं । पूर्वमासीद्युधिष्ठिर ॥ उद्यमानुसृताः पश्चा—द्दुर्भूता जातयः पृथक् ॥ १ ॥ इत्यभयकुमारोक्तं श्रुत्वा श्रेणिकस्तस्मै मेतार्याय निजपुत्रीं ददौ, पूर्ववृतास्ता अष्टावपि कन्यास्तं मेतार्यमेवाङ्गीचक्रुः, ततो राज्ञा तस्मै मेतार्याय महोत्सवेन गृहमर्पितं. एवं ताभिर्नवभिः प्रियाभिः सह सुखान्यनुभवन् स मेतार्यो द्वादशाब्दीमतिचक्राम. ततः पुनरपि तेन देवेन प्रतिबोधितः स मेतार्यो वैराग्यं प्राप्य स्वपुत्रेभ्यः स्वां श्रियं वितीर्य सद्गुरोः गुरुपार्श्वे व्रतं जग्राह. क्रमेण द्वादशाङ्गीपारगामी गीतार्थो मुनिः स मेतार्यो जिनकल्पिविहारं अधात्. अन्यदा पुरमध्ये गोचर्यायां परिभ्रमन् स मेतार्यऋषिः कस्यचित् सुवर्णकारस्य गृहे जगाम. अथ श्रेणिकराजो प्रतिदिनं जिनपूजां कुर्वन् प्रभुप्रतिमाग्रे अष्टोत्तरशतस्वर्णमययवैः स्वस्तिकं करोति स्म, अतः स सुवर्णकारो राज्ञा दिष्टो नित्यं तान् स्वर्णयवान् निजगृहे घटयति स्म. अथ तत्र मेतार्यमुनिस्तत्राहारार्थं आगतः, तदा स स्वर्णकारस्तान् घटितयवांस्तत्रैव मुक्त्वा किं स्वगृहान्तः स्वर्णकारः प्रविष्टः. इतस्ततः क्रौञ्चपक्षी तत्र समागत्य तान् स्वर्णयवान् मुनिः ...

॥ १२ ॥ चरित्रम् ॥ ६६ ॥ [illegible] ग्रन्थ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तोऽगलत्. ततो बहिरागतः स्वर्णकारो यवानपश्यन् मुनिं पृष्टवान्. भो मुने ! क्व गता मे स्वर्णयवाः ? किं त्वया
वान्येन केनचिद् गृहीताः? तत् श्रुत्वा पापभोरुः स मेतार्यमुनिर्दध्यौ, यदि यवगमनस्वरूपं कथ्यते, तदा
सावेनं क्रौंचं हन्यात्, इति ध्यात्वा स मुनिर्मौनमाश्रितः. एवं कृतमौनं तं मुनिं, त्वमेव चौर इति ज-
ल्पन् स स्वर्णकृत् आर्द्रचर्मवध्रेण तस्य मुनेर्मस्तकं गाढं वेष्टयामास. ततो निर्गतचक्षुषो जीवदयां ध्यायतस्त-
दैवोत्पन्नकेवलज्ञानस्य तस्य मुनेरायुषः समाप्तेस्तत्क्षणमेव मुक्तिगमनमभूत्. इतः कुञ्चितग्रीवः स क्रौञ्च-
श्चिन्वन्नंगणे समागतो दास्या भापितश्चाकस्मात्तान् यवान् गुदाद्वारेण मुमोच. ततस्तं यतिं मृतं, क्रौञ्च-
गलितमुत्सृष्टान् स्वर्णयवांश्च निरीक्ष्य लोकाः प्रोचुः, अरे ! अनेन दुष्टेन स्वर्णकारेण मुधैव भूपतिजामाता
हतः, अथ कुपितो राजा नूनमेनं स्वर्णकारं सकुटुम्बं शूलाप्रक्षेपादिना हनिष्यति. अथ राजापि मुनिहन-
नस्वरूपं विज्ञाय तं स्वर्णकारं सकुटुम्बं हंतुं स्वसेवकान् प्रेषयामास. ततो यावत्ते राजप्रेषिताः सेवकास्त-
स्य स्वर्णकारस्य गृहे समायातास्तावत् समुत्पन्नौत्पातिकीबुद्धिः सकुटुम्बः स स्वर्णकृद्गृहीतो यतिवेषं गृही-
त्वैवास्थात्. यतः—लज्जातो भयतो वितर्कविधितो मात्सर्यतः स्नेहतो । लोभादेव हठाभिमानविनयश्रृंगा

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रकीर्त्यादितः ॥ दुःखात् कौतुकविस्मयव्यपकृतेर्भावात्कुलाचारतो । वैराग्याच्च भजन्ति धर्ममलं तेषाममेयं फलं ॥ १ ॥ ततस्तैः सुभटै राज्ञः पार्श्वे गत्वा प्रोक्तं स्वामिन्! स स्वर्णकारस्तु सकुटुम्बो व्रतं गृहीत्वा भीतः स्थितोऽस्ति. तत् श्रुत्वा राजा स्वयं तत्रैत्य तं स्वर्णकारमवदत्, भो स्वर्णकृत! त्वया यन्निघातेन महत्पातकमाचरितं, परं चारित्रग्रहणान्मया त्वं मुक्तोऽसि, अथ यदि त्वया वान्येन केनचित्त्वत्कुटुम्बमध्येन संयमोऽयं मोक्ष्यते, तदा सकुटुम्बं त्वां हनिष्यामि. इत्युक्त्वा राजा स्वस्थानं गतः. ततः स सौवर्णिकोऽपि श्रीवीरपादांते गत्वा दीक्षां लात्वा क्रमात्तप्तोग्रतपाः सकुटुम्बः स्वर्गसौख्यभागभूत्.

॥ इति वचःसंयमफलोपदर्शने श्रीमेतार्यमुनिकथा समाप्ता ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ इति श्रीमेतार्यमुनिचरित्रं समाप्तम् ॥

४०८६

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust